काशश्वासक्षयच्छर्द्दिस्वरसादादयो गदाः ॥
भवन्त्युपेक्षया यस्मात् तस्मात्तं त्वरया जयेत् ।
इति गारुड़े काशरोगनिदानं १५४ अध्यायः ॥ * ॥

अथ काशस्य चिकित्सा ।

तत्र वातकाशस्य चिकित्सा ॥
"वास्तूको वायसीशाकं मूलकं सुनिषसकम् ।
स्नेहास्तैलादयो भक्ष्याः क्षीरेक्षुरसगौड़िकाः ॥
दध्यारनालाम्लफलं प्रसन्नापानमेव च ।
शस्यते वातकाशेषु स्वाद्वम्ललवणानि च ॥
वायसी काकमाची कवई इति लोके । सुनिषसकं सिसुयारि इति लोके शाकविशेषः । चाङ्गेरीसदृशचतुष्पत्रा सजलदेशे भवति । चौपत्ति इति लोके ॥
"ग्राम्यानूपोदकैः शालियवगोधूमषष्टिकान् ।
रसैर्म्माषात्मगुप्तानां यूषैर्व्वा भोजयेद्धितान्" ॥
ग्राम्यानूपोदकैः रसैरित्यन्वयः । आत्मगुप्ता किवाछ इति लोके ॥
"दशमूलीकृता काशश्वासहिक्कारुजापहा ।
यवागूर्दीपनी हृष्या वातरोगविनाशिनी ॥
रसः कर्क्कटकानां वा घृतभृष्टः स नागरः ।
वातकाशप्रशमनः षट्कृमत्स्यस्य वा पुनः" ॥ * ॥

अथ पित्तकाशस्य चिकित्सा ।

"कण्टकारीयगद्राक्षावासाकर्चूरवालकैः ।
नागरेण च पिप्पल्या क्वथितं सलिलं पिबेत् ॥
शर्करामधुसंयुक्तं पित्तकाशहरं परम्" ॥ * ॥

अथ कफकाशस्य चिकित्सा ।

"पिप्पली कट्फलं शुण्ठी शृङ्गी भार्गी तथोषणम् ।
कारवी कण्टकारी च सिन्धुवारो यवानिका ॥
चित्रको वासकश्चैषां कषायं विधिवत् कृतम् ।
कफकाशविनाशाय पिबेत् कृष्णारजोयुतम्" ॥
पिप्पल्यादिक्वाथः ॥ * ॥

अथ क्षतजकाशस्य चिकित्सा ।

"इक्षुरालिकापद्ममृणालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा शृङ्गी शतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात्तन्मधुसर्पिर्भ्यां क्षतकाशनिवृत्तये" ॥
इक्षुरालिका इक्षुभेदः । चन्द्र इति लोके । पद्मं पद्मकाष्ठम् । मृणालं विशम् । उत्पलं कमलम् । चन्दनमत्र धवलम् चूर्णत्वात् । शृङ्गी कर्कटशृङ्गी । तुगाक्षीरी वंशलोचना । सा चेक्षोर्द्विगुणा ॥*॥ अथ क्षयकाशचिकित्सा । "चूर्णं काकुभमिष्टं वासकरसभावितं बहून् वारान् । मधुघृतसितोपलाभिर्लेह्यं क्षयकाशरक्तपित्तहरम्" ॥
काकुभं चूर्णं ककुभत्वक्चूर्णम् ॥ * ॥

अथ काशस्य सामान्यतश्चिकित्सा ।

"ताम्यमानस्य काशेन नासास्रावे स्वरे जड़े ।
क्षवथौ गन्धनाशे च धूमपानं प्रयोजयेत् ॥
मनःशिलालमरिचं मांसीमुस्तेङ्गुदैः पिबेत् ।
धूमं त्र्यहं च तस्यानु पयश्च सगुड़ं पिबेत् ॥
एष काशान् पृथक् द्वन्द्वसर्व्वदोषसमुद्भवान् ।
शतैरपि प्रयोगाणामसाध्यान् साधयेत् ध्रुवम्" ॥
आलं हरितालम् ॥ इङ्गुदमिह पुत्रजीवकफलम् ॥
"बदरीदलमालिप्तं शिलाया घर्म्मशोषितम् ।
तद्धूमपानं सक्षीरं महाकाशनिवारणम् ॥
कण्टकारिकृतक्वाथः सकृष्णः सर्व्वकाशहा ।
कण्टकार्य्याः कषायश्च चूर्णं समधु काशहृत् ॥

लवङ्गजातीफलपिप्पलीनां
भागान् प्रकल्प्याक्षसमानमीषाम् ।
पलार्द्धमानं मरिचं प्रदेयं
पलानि चत्वारि महौषधस्य ॥
सितासमस्तेन समाप्य चूर्णं
रोगानिमानाशु बलान्निहन्ति ।
काशज्वरारोचकमेहगुल्म-
श्वासाग्निमान्द्यग्रहणीविकारान्" ॥

समशर्करचूर्णं वटिका वा ॥
"कुनटीसैन्धवव्योषविड़ङ्गामयहिङ्गुभिः ।
लेहः साज्यमधुः काशश्वासहिक्कानिवारणः" ॥*॥
"हरीतकीकणा शुण्ठी मरिचं गुड़संयुतम् ।
काशघ्नो मोदकः प्रोक्तः परं वह्नेः प्रदीपनः" ॥*॥
"कर्षः कर्षांशौ पलं पलद्वयं स्यात्ततोऽर्द्धकर्षश्च ।
मरिचस्य पिप्पलीनां दाड़िमगुड़यावशूकानाम्" ॥
सर्व्वौषधैरसाध्याः काशा ये वैद्यनिर्म्मुक्ताः ।
अपि यूयं छर्द्दयतां तेषामिदमौषधम्" ॥
पथ्यम् ॥ वङ्गसेनस्तु कर्षांश इति पाठे कर्षांशः कर्षार्द्धमिति व्याचष्टे ॥
"मरिचं कर्षमात्रं स्यात् पिप्पली कर्षसंमिता ।
अर्द्धकर्षो यवक्षारः कर्षयुग्मञ्च दाड़िमम् ॥
एतच्चूर्णीकृतं युञ्ज्यादष्टकर्षगुड़ेन हि ।
शाणप्रमाणां गुटिकां कृत्वा वक्त्रे विधारयेत् ॥
अस्याः प्रभावात् सर्व्वेऽपि कासा यान्त्येव संक्षयम्" ॥
दाड़िमं दाड़िमफलवल्कलं ग्राह्यम् । मरिचादिवटिका ॥ * ॥

"समूलवल्कच्छदकण्टकार्य्या-
स्तुलां ततो द्रोणमितं जलञ्च ।
हरीतकीनां शतमेकपात्रे
विपच्य कुर्य्याच्चरणाम्बुशेषम् ॥
तस्मिन् कषाये तनुवस्त्रपूते
हरीतकीभिः सहितो गुड़स्य ।
तुलां विनिःक्षिप्य पचेत् सुपक्व-
मेतत् समुत्तार्य्य सुशीतले च ॥
पलं पलञ्चापि कटुत्रयञ्च
तथा चतुर्जातपलं विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तत्र विमिश्रयेच्च ॥
प्रयुज्यमानो विधिनैष लेहो
यथाबलञ्चापि यथानलञ्च ।
वातात्मकं पित्तकृतं कफोत्थं
द्विदोषजातानपि च त्रिदोषम् ॥
क्षतोद्भवञ्च क्षयजञ्च काशं
श्वासञ्च हन्यात् सह पीनसेन ।
यक्ष्माणमेकादशसुग्ररूपं
हरीतकीयं भृगुणोपदिष्टा" ॥

पुष्परसो मधु । चतुर्जातं त्वगेलापत्रनागकेशराः ।
भृगुहरीतकी ॥ * ॥
"कण्टकारीतुलां नीरद्रोणे पक्त्वा कषायकम् ।
पादशेषं गृहीत्वा च तत्र चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुड़ूचीचव्यचित्रकाः ।
मुस्तं कर्कटशृङ्गी च त्र्यूषणं धन्वयासकः ॥
भार्गी रास्ना सटी चैव शर्करा पलविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः ॥
पक्त्वा लेहत्वमानीय शीते मधुपलाष्टकम् ।
चतुष्पलं तुगाक्षीर्य्याः पिप्पलीञ्च चतुष्पलाम् ॥
क्षिप्त्वा निदध्यात् सुदृढ़े मृण्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कार्त्तिकासश्वासानशेषतः" ॥
कण्टकार्य्यावलेहः । इति कासाधिकारः । इति भावप्रकाशः ॥ * ॥ अपि च ।
"हरीतकीकणा शुण्ठी मरिचं गुड़संयुतम् ।
काशघ्नो मोदकः प्रोक्तस्तृष्णारोचकनाशनः ॥
कण्टकारीगुड़ूचीभ्यां पृथक् त्रिंशत्पलाद्रसे ।
प्रस्थसिद्धो घृतादाहकाशनुद्वह्निदीपनः" ॥
इति गारुड़े १७४ अध्यायः ॥
"मनःशिला बलामूलं काकपर्णञ्च गुग्गुलुम् ।
जातिपत्रं कोलिपत्रं तथा चैव मनःशिला ॥
एभिश्चैव कृता वर्त्तिर्बदराग्नौ महेश्वर ! ।
धूमपानं काशहरं नात्र कार्य्या विचारणा" ॥
इति च गारुड़े १९४ अध्यायः ॥
"कतकस्य फलं शङ्खं सैन्धवं त्र्यूषणं वचा ।
फेनोरसाञ्जनं क्षौद्रं विड़ङ्गानि मनःशिला ।
एषां वर्त्तिर्हन्ति काशं तिमिरं पटलं यथा" ॥
इति तत्रैव १९८ अध्यायः ॥
"अभयामलकं द्राक्षा पिप्पली कण्टकारिका ।
शृङ्गं पुनर्नवा शुण्ठी जग्धा काशं निहन्ति वै" ॥
इति च तत्रैव १९९ अध्यायः ॥

काशकः, पुं, (काशते दीप्यते इति । काश + कर्त्तरि ण्वुल् । ) काशः । इति शब्दरत्नावली ॥ केश्या इति भाषा ॥

काशमर्द्दः, पुं, (काशं मृद्नाति उपशमयति नाशयति वा । मृद + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) कासमर्द्दवृक्षः । इत्यमरटीकायां रायमुकुटः ॥ (कासमर्द्दशब्देऽस्य गुणाः पर्य्यायाश्च ज्ञेयाः ॥)

काशा, स्त्री, (काशते इति । काश + अच् + टाप् ।) काशतृणम् । इत्यमर-टीकायां भरतः ॥

काशाल्मलिः, स्त्री, (कुत्सिता शाल्मलिः । कोः कादेशः ।) कूटशाल्मलिः । इति जटाधरः ॥

काशिः, स्त्री, (काश् + "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् ।) काशी । इत्युणादिकोषः ॥ (यथा हेः रामायणे १ । १३ । २३ ।
"तथा काशिपतिं स्निग्धं सततं प्रियवादिनम् ।
सद्वृत्तं देवसङ्काशं स्वयमेवानयस्व हि" ॥)
काशिनगरोपलक्षिते जनपदे पुंभूम्नि ।
यथा महाभारते ६ । ९ । ४१ ।
"अत ऊर्द्धं जनपदान्निबोध गदतो मम" ।
"बोधा मद्राः कलिङ्गाश्च काशयो ऽपरकाशयः" ॥
मुष्टिः । इति निरुक्तिः । यथा ऋग्वेदे ७ । १०४ । ८ । "आप इव काशिना संगृभीतो असन्नस्त्वा-